**पुराणेतिहासयोः परिचयः**

**पाठ्यांशः -4, अध्ययनाङ्कः -04**

**प्राक्शास्त्रि-द्वितीयवर्षच्छात्रेभ्यः चतुर्थसत्रार्धे निर्दिश्टः पाठ्यक्रमः**

# विषयानुक्रमणिका

Credit-1 (16 hours)

**1.पुराणानि**

1.1 पुराणशब्दस्य व्युत्पत्तिः ।

1.2 पुराणानाम् उत्पत्तिः।

1.3 अष्टादशपुराणानां कर्ता

1.4 पुराणानां प्रचारः

1.5 पुराणानां लक्षणम् (पञ्चलक्षणानि दशलक्षणानि च)

1.6पुराणस्य भेदाः।

1.6.1 महापुराणानि।

1.6.2 उपपुराणानि

1.7 पुराणस्य प्रयोजनम्।

**2. इतिहासः**

2.1 इतिहासशब्दस्य व्युत्पत्तिः, इतिहासपुराणयोः भेदः,इतिहासस्य लक्षणं च।

2.2 इतिहासस्य भेदाः , इतिहासस्य प्रयोजनम् च।

2.2.1 रामायणम्। रामायणकर्तुः परिचयः

2.2.2 रामायणस्य रचनाकालः

2.2.3 रामायणे काण्डविभागः, प्रतिपाद्यांशाश्च

2.3.4 महाभारतम्, महाभरतस्य कर्ता, पर्वाणि च।

**3.पुराणस्य प्रतिपाद्यविषयाः**

3.1सर्गः

3.2प्रतिसर्गः

3.3 वंशः

3.4मन्वन्तराणि

3.5 वंशानुचतितम्

**पुराणस्य दशलक्षणानि**

3.6 सर्गः

3.7 प्रतिसर्गः

3.8वृत्तिः
3.9रक्षा
3.10मन्वन्तराणि
3.11वंशः
3.12 वंशानुचरितम्
3.13संस्था
3.14 हेतुः
3.15 उपाश्रयः

**4. इतिहासस्य सामान्येन प्रतिपाद्यः विषयः**

**5.अवतारतत्त्वानि**
5.1 अवतारस्य प्रयोजनम्
5.2 अवतारस्य बीजम्
5.3 मत्स्यावतारः
5.4 कूर्मावतारः
5.5 वराहावतारः
5.6 नरसंहावतारः
5.7 वामनावतारः
5.8 परशुरामावतारः
5.9 रामावतारः
5.10 कृष्णावतारः
5.11 बुद्धावतारः
5.12 कल्की -अवतारः
**सङ्केताक्षरसूची**
**आदर्शप्रश्नाः**
**अनुबन्धः– अष्टादशपुराणानां सक्षिप्तपरिचयः**

**पाठ्यक्रमस्य उद्देश्यम्**

- छात्राः पराणेतिहासानां सामान्यपरिचयं प्राप्नुयुः।
- पुराणेतिहासयोः लक्षणं जानीयुः।
- पुराणे प्रतिपादितांशानां सामान्यज्ञानं प्राप्नुयुः।

➢ पुराणेतिहासानां विषये आसक्तिं प्राप्य नूतनविषयान् ज्ञातुं प्रयत्नं कुर्युः।

➢ पुराणेतिहासानाम् उद्देश्यं प्रयोजनं च जानीयुः।

## 1. पुराणम्

### 1.1 पुराणपदस्य व्युत्पत्तिः

'पुरा नवम् भवति' इति पुराणशब्दस्य अर्थः यास्केन उक्तः। "पुरा भवं पुराणम् " इति वैयाकरणानां व्युत्पत्तिः। "पुरा परम्परां वक्ति" इति पद्मपुराणे उक्तमस्ति । "व्यासादिमुनिप्रणीतवेदार्थवर्णित - पञ्चलक्षणान्वितं शास्त्रम्" इति शब्दकल्पद्रुमकोशे व्याख्यातम्। "पुरा परम्परां वक्ति पुराणं तेन तत् स्मृतम्" इति वायुपुराणे प्रतिपादितम् ।

### 1.2 पुराणानाम् उद्भवः

नारायणस्य नाभिकमले उत्पन्नः ब्रह्मा जगतः सृष्टिं करोति । अतः बह्मा सृष्टिकर्ता इति प्रसिद्धः। सृष्टिः कथं करणीया इति अज्ञात्वा ब्रह्मा श्रीमन्नारायणं पृच्छति। "तदा नारायणस्य अनुग्रहेण वेदज्ञानं प्राप्नोति। ततः सृष्टिं निर्वर्तयति। वेदज्ञानेन सह पुराणज्ञानमपि ब्रह्मा प्राप्तवान्। सः कालान्तरे स्वस्य चतुर्भिःमुखैः वेदम् ऋषिभ्यः उपदिष्टवान्। तथैव स्वस्य पञ्चममुखेन पुराणानि अपि उपदिष्टवान्। कालान्तरे ब्रह्मणः पञ्चमं मुखम् ईश्वरः उत्पाटितवान्। तदारभ्य ब्रह्मा चतुर्मुखः जातः। लोकेऽपि ब्रह्मा चतुर्मुखः इत्येव ख्यातः अभवत् ।

भगवतः आज्ञया चतुर्मुखः ब्रह्मा चराचारजगतः सृष्टिम् अकरोत्। दृश्यजगतः सृष्टेः समं शब्दप्रपञ्चस्यापि सृष्टिः तेनैव कृता। मया सृष्टाः कष्टकर्षिताः, दुःखतप्ताः च मा भवेयुः इति सत्सङ्कल्पेन वेदवाङ्मयः वेदपुरुषेण ब्रह्मणा दत्तः। वेदैः सहैव वेदार्थस्य स्पष्टनिरूपणार्थं पुराणान्यपि ब्रह्मणा उपदिष्टानि। द्वापरयुगे विष्णोः अवतारभूतः भगवान् वेदव्यासः तत् पुराणवाङ्मयम् अष्टादशधा विभज्य उपादिशत्। व्यासमुखात् तानि पुराणानि रोमहर्षणस्य पुत्रःउग्रश्रवसूतः श्रुत्वा शौनकादिऋषीणां द्वारा लोके प्रासारयत्।

वेदाः यथा प्राचीनाः तथैव पुराणान्यपि प्राचीनानि । यथा वेदानां वक्ता ब्रह्मा तथैव पुराणानामपि वक्ता स एव। परमात्मनः अनुग्रहेण यथा वेदाः प्राप्ताः तथैव पुराणानि अपि प्राप्तानि। वेदा: यथा नित्यानि तथा पुराणानि अपि नित्यानि।

1.3 अष्टादशपुराणानां कर्ता

सत्यवतीसुतः वेदव्यासः एव अष्टादशपुराणानां कर्ता । किन्तु ब्रह्मा पुराणानां प्रवर्तकः इति पूर्वतनप्रसङ्गे उक्तमस्ति। अतः परस्परविरोधः अस्तीति न चिन्तनीयम्। कालक्रमे ब्रह्मणः पञ्चमं मुखं यथा नष्टं तथैव पुराणानि अपि नष्टानि। वेदानां विभागकर्ता सत्यवतीसुतः, कृष्णद्वैपायनः यथा वेदोद्धरणम् अकरोत् तथैव पुराणोद्धरणमपि अकरोत् ।**पुराणानां कर्ता वेदव्यासः इत्यत्र पुराणानां परिष्कर्ता इति अर्थः विद्वद्भिः उक्तः**। वेदव्यासमहर्षिः उग्रश्रवाः इति सूताय पुराणानि उपादिशत् । एषः उग्रश्रवाः रोमहर्षणस्य पुत्रः। एष एव पुराणानि लोके प्रसारितवान्। अतः सर्वेषु पुराणेषु सर्वाः कथाः "सूत उवाच" इति आरब्धाः भवन्ति।

1.4 पुराणानां प्रचारः

एकदा नैमिषारण्ये महाभारतयुद्धानन्तरम् ऋषयः सत्रयागम् अकुर्वन् । तदा तत्र भारतवर्षस्य सहस्रशः मुनयः समागताः आसन्। ते सर्वे सत्रयागस्य विरामसन्दर्भे उग्रश्रवसूतं पुराणानां विषये प्रश्नान् अपृच्छन्। तेषां प्रश्नमनुसृत्य सूतपौराणिकेन पुराणानि प्रोक्तानि । सत्रयागे श्रुतानि पुराणानि ऋषयः स्वस्वस्थानेषुप्रचारम् अकुर्वन्।एवं भारतवर्षस्य विविधस्थानेषु पुराणानि जनेषु प्रसिद्धानि अभवन्।

1.5 पुराणस्य लक्षणम् -

विष्णुपुराणे पुराणस्य पञ्चलक्षणानि प्रतिपादितानि। यथा-

सर्गश्च प्रतिसतश्च वंशो मन्वन्तराणि च।<br>
वंशानुचरितं चैव पुराणं पञ्चलक्षणम् ॥ वि.पु., ३.६.२४

एते अंशाः पुराणेषु बाहुल्येन उपलभ्यन्ते इति अस्य श्लोकस्य तात्पर्यम्। केवलम् एते एव अंशाः पुराणेषु भवन्ति इति तु न चिन्तनीयम्। सर्गादीनां लक्षणानां विवरणम् अग्रे वयं पठिष्यामः। पुराणानां दशलक्षणान्यपि प्रतिपादितानि। यथा–

**सर्गोऽस्याथ विसर्गश्च वृत्तीरक्षान्तराणि च ।**<br>
**वंशो वंशानुचरितं संस्थाहेतुरपाश्रयः । ।**<br>
**दशभिर्लक्षणैर्युक्तं पुराणं तद्विदो विदुः ।**<br>
**केचित् पञ्चविधं ब्रह्मन् ! महदल्पव्यवस्थया ।। भाग.पु.,१२.७.१६**

सर्गः, प्रतिसर्गः, वृत्तिः, रक्षा, अन्तराणि, वंशः, वंशानुचरितं, संस्था, हेतुः, अपाश्रयःच इति दशलक्षणानि भागवतपुराणे उक्तानि सन्ति।

1.6 **पुराणभेदाः**

पुराणनां पञ्चलक्षणानि दशलक्षणानि च किमर्थम् उक्तानि इति विषये भागवतमहापुराणे स्पष्टता दत्ता वर्तते।

दशभिर्लक्षणैर्युक्तं पुराणं तद्विदो विदुः।

केचित् पञ्चविधं ब्रह्मन् महदलपव्यवस्थया।भाग.पु.,१२.७.१६

पञ्चलक्षणानितु सर्वेषु पुराणेषु उपलभ्यन्ते। महापुराणेषु सर्वाणिदशलक्षणानि दृश्यन्ते।

**महदल्पव्यवस्थया** इति वचनेनपुराणानि द्विधा सन्ति इति ज्ञायते । एतानि महापुराणानि उपपुराणानि इति च लोके प्रसिद्धानि। उपपुराणान्यपि व्यासप्रणीतानि इत्येव परिगण्यन्ते। उपपुराणेषु अपि देवीभागवतादीनि प्रसिद्धानि। महापुराणानि दशलक्षणसमन्वितानि, महान्ति च। उपपुराणानि पञ्चलक्षोपेतानि महापुराणानामपेक्षया लघूनि च।

1.6.1**महापुराणानि-**

व्यासमहर्षिणा अष्टादशमहापुराणानि उपदिष्टानि। तानिच-

1.बह्मपुराणम् 2 पद्मपुराणम् 3.विष्णुपुराणम् 4.शिवपुराणम् 5.भागवतपुराणम् 6.नारदीयपुराणम् 7.मार्कण्डेयपुराणम् 8.अग्निपुराणम् 9.भविष्यपुराणम् 10.ब्रह्मवैवर्तपुराणम्11.लिङ्गपुराणम् 12.वराहपुराणम् 13.स्कान्दपुराणम् 14.नारदपुराणम् 15. ब्रह्माण्डपुराणम् 16.कूर्मपुराणम् 17.मत्स्यपुराणम् 18.गरुडपुराणम्

एतेषाम् अष्टादशपुराणानां नामस्मरणार्थं कश्चन श्लोकः प्राचीनैः उक्तः। पुराणानां प्रारम्भाक्षरैः तेषां स्मरणं यथा सुलभं स्यात् तथा कश्चन श्लोकः पूर्वैः प्रदत्तः ।

**मद्वयं भद्वयं चैव ब्रत्रयं वचतुष्टयम्।**
**अनापलिंगकूस्कानि पुराणानि प्रचक्षते ॥**

म-2, भ- 2, ब्र-3, व-4, अ-1,न-1,प-1,लिं-1,ग-1, कू-1, स्क -1

म- मत्स्य, मार्कण्डेयपुराणे

भ- भागवत- भविष्यपुराणे,

ब्र – ब्रह्मवैवर्त-ब्रह्म - ब्रह्माण्डानि

व- विष्णु-वायु-वराह-वामनपुराणानि

अ- अग्निपुराणम्

ना-नारदीयम्

प-पद्मपुराणम्
लिं- लिङ्गपुराणम्
ग- गरुडपुराणम्
कू-कूर्मपुराणम्
स्का – स्कान्दपुराणम्

**सूचना- अष्टादशपुराणानां संक्षिप्तः परिचयः अनुबन्धे दत्तः।**

**उपपुराणानि**

उपपुराणानि अपि व्यासप्रणीतानि इति प्रतीतिःवर्तते। महापुराणानीव उपपुराणान्यपि अष्टादश परिगण्यन्ते। महापुराणसादृश्यम् एतेषु पुराणेषु दृश्यते। विविधैः मुनिभिः एतानि पुराणानि लोके प्रसारितानि । उपपुराणानि कानि इति विषये समाधानरूपेण केचन श्लोकाः दृश्यन्ते। यथा –

१.आदिपुराणम्२.नरसिंहपुराणम्३. स्कन्दपुराणम्४. शिवधर्मपुराणम्५.दुर्वासपुराणम्६.नारदीयपुराणम्, ७. कपिलपुराणम् ८. वामनपुराणम्९. औशनसपुराणम्१०. ब्रह्माण्डपुराणम्११. वरुणपुराणम्१२. कालिकापुराणम्१३. माहेश्वरपुराणम्१४.साम्बपुराणम्१५.सौरपुराणम्१६. पाराशरपुराणम् १७. मारीचपुराणम्, १८.भास्करपुराणञ्च। इमानि सन्ति अष्टादशोपपुराणानि । तथाहि -

आद्यं सनत्कुमारोक्तं नारसिंहमथापरम् ।
तृतीयं स्कान्दमुद्दिष्टं कुमारेण तु भाषितम् ।
चतुर्थं शिवधर्माख्यं साक्षान्नन्दीशभाषितम् ।
दुर्वाससोक्तमाश्चर्यं नारदीयमतः परम् ।।
कपिलं वामनं चैव तथैवोशनसेरितम् ।
ब्रह्माण्डं वारुणं चाथ कालिकाह्वयमेव च।।
माहेश्वरं तथा साम्बं सौरं सर्वार्थसञ्चयम् ।
पाराशरोक्तमपरं मारीचं भास्कराह्वयम् ।। कू.पु.,पूर्वार्द्धे.,१/१७-२०

पाठान्तरश्लोकः अपि कश्चन वर्तते -

आदौ सनत्कुमारोक्तं नारसिंहं ततः परम्।
तृतीयं वायवीयञ्च कुमारेण च भाषितम् ॥
चतुर्थं शिवधर्माख्यं च साक्षान्नन्दीशभाषितम्।
दुर्वाससोक्तमाश्चर्यं नारदीयमतः परम् ॥
नन्दिकेश्वरोक्तञ्च तथैवोशनसेरितम् ।

कापिलं वारुणं साम्बं कालिकाह्वयमेव च॥
माहेश्वरं तथा कल्की दैवं सर्वार्थसिद्धिदम् ।
पराशरोक्तमपरं मारीचं भास्कराह्वयम् ॥

उपपुराणानां नाम्नां विषये मतभेदाः वर्तन्ते। एतानि अतिरिच्यापि बहूनि पुराणानि उपलभ्यन्ते । तानि औपपुराणानि इत्यपि कथ्यन्ते। बहूनि पुराणानि अप्रकाशितानि अपि । बहुषु स्थानेषु बहूनि पुराणानि खण्डशः उपलभ्यन्ते। प्राचीनकाले पुस्तकानां (ग्रन्थानां) लेखनं,संरक्षणं, प्रचारं च बहु कष्टसाध्यमासीत्। श्रद्धालवः बहवः तालपत्रग्रन्थालयान् गत्वा स्वेभ्यः अपेक्षितं ग्रन्थभागं लिखित्वा आनयन्ति स्म । तेन कारणेन बहवः ग्रन्थाः खण्डशः एव उपलभ्यन्ते। तावन्मात्रेण ते ग्रन्थाः अप्रामाणिकाः इति न मन्तव्यम्। पूर्वतनानां क्लेशाः परिश्रमश्च अस्माभिः ज्ञातव्यः आदरणीयश्च।

### 1.7 पुराणस्य प्रयोजनम्

पुराणानि भारतीयानां विश्वकोषाः।भारतीयानां जीवनस्य सर्वेऽपि विषयाः अत्र उपलभ्यन्ते। वेदःभारतीयानां मूलवाङ्मयम्। वेदेषु प्रतिपादितानां विषयाणां विशदीकरणं पुराणेषु दृश्यते। भारतीयानाम् इतिहासः अपि पुराणेषु अभिवर्णितः। वेदार्थनिर्णयदृष्ट्या पुराणानाम्अध्ययनम् अनिवार्यम् ।
वायुपुराणे अस्मिन् विषये एवम् उक्तमस्ति -

यो विद्याच्चतुरो वेदान् साङ्गोपनिषदो द्विजः।
न चेत् पुराणं संविद्यात् नैव स स्वाद् विचक्षणः॥

साङ्गोपाङ्गं वेदचतुष्टयम् अधीत्यापि पुराणज्ञानेन विना वेदार्थं ज्ञातुं न प्रभवति। अत्र उदाहरणमेकं पश्यामः ।

" इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्। समूढमस्य पांसुरे "(ऋग्वेद 3.22.19, यजुर्वेदे-15, सामवेदे पूर्वाधके – १)

इति कश्चन मन्त्रः ऋग्वेद-यजुर्वेद-सामवेदे च दृश्यते। प्रसिद्धः वेदभाष्यकारः महीधरः अस्य मंत्रस्थ एवम् अर्थविवरणम् अकरोत् -"विष्णुः त्रिविक्रमावतारं कृत्वा इदं विश्वं विचक्रमेविभज्य क्रमते स्म । तदेवाह त्रेधा पदं निदधे- भूमौ एकं पदम्, अन्तरिक्षे द्वितीयं, दिवि तृतीयम् इति।" पुराणेषु वामनावतारस्य विस्तृतविवरणम् उपलभ्यते। वेदे वामनावतारस्य विस्तृतविवरणं नास्ति। पुराणानाम् आधारेण वेदोक्तानां बहूनां विषयाणां विवरणं सिध्यति। "इतिहासपुराणं च पञ्चमो वेद उच्यते।" इति भागवतमहापुराणे वेदेन समानं गौरवम् इतिहासपुराणानां प्रतिपादितम्।"इतिहासपुराणाभ्यां वेदं

समुपबृंहयेत् " इति वेदार्थनिर्णये इतिहासपुराणानां ज्ञानम् अनिवार्यमिति प्रतिपादितं नारदपुराणे-

वेदार्थादधिकं मन्ये पुराणार्थं वरानने।
वेदाः प्रतिष्ठिताः सर्वे पुराणे नात्र संशयः॥ ना.पु 2.24.17

इति पुराणप्रतिपादितांशानां प्राशस्त्यं प्रशंसितम्।पुराणेषु प्रतिपादितांशानां परिशीलनेन पुराणप्रयोजनं स्पष्टं भवति।

पुराणेषु जगतः सृष्टेः कारणानि, सृष्टिविधानम्,भक्तिः, वेदान्तः, मनश्शास्त्रम्, धर्मशास्त्रं, राजनीतिः, दण्डनीतिः, अर्थशास्त्रं, व्याकरणादिषडङ्गपरिचयः एवं बहवः विषयाः प्रतिपादिताः। वेदार्थज्ञाने एव न अपि तु दर्शनानामध्ययने, धर्मशास्त्राध्ययने, अलङ्कारशास्त्राध्ययने, शिल्पशास्त्रे, चित्रकलायां, भरतनाट्यादि नृत्यकलासु पुराणान्येव प्रमाणभूतानि । पुराणानि पुरुषार्थचतुष्टयस्य, ब्रह्मचर्यादि चतुर्णाम् आश्रमाणां विचारं विशदीकरोति। पुराणानि सर्वशास्त्राणां समाहारः इति कथने नास्ति दोषः।

आलयानां विविधप्रकाराः, उपासना, भूमेः विस्तारः, द्वीपानां वैशाल्यं, नदीनां विस्तारः, पर्वतानां नामानि, देशानां नामानि इत्यादयः भौगोलिकशास्त्रविचाराः उक्ताः।पञ्चभूतानां विचाराः, अरण्यपरिरक्षणम्, प्रकृतिपरिरक्षणं, प्राकृतिकविपदां सूचना, वृष्टिविचाराः, तापत्रयनिवारणोपायाः पुराणे सूचिताः। व्याधिकारणं, तन्निवारणोपायाः आयुर्वेदादिशास्त्रविचाराः पुराणेषु वर्तन्ते।पुण्यक्षेत्राणां, नदीनां, पर्वतानां च माहात्म्यकथनेन जनाः प्रकृतेः परिरक्षणे प्रवृत्ताः यथा भवेयुः तथा उपदेशाः कृताःच।

**2. इतिहास :**

2.1 इतिहासशब्दस्यव्युत्पत्तिः, इतिहासपुराणयोः भेदश्च

“इतिहासः पुरावृत्तम्” इति अमरकोशकारेण निर्वचनं दत्तम् । “इतिह आस्ते अस्मिन्”इति अर्थे इति ह आस इति अवस्थायां घञ् प्रत्ययेन व्याकरणप्रक्रिया साधिता।पूर्ववृत्तान्तः,प्राचीनकथा, पूर्ववृत्तः इति समानार्थकपदानि सन्ति। पूर्वं प्रवृत्तः यथार्थवृत्तान्तः इतिहासत्वेन परिगण्यते। "यस्मात् पुराह्यभूत् चैतत् पुराणं तेन तत् स्मृतम्" इति ब्रह्माण्डपुराणस्य पुराणपदस्य व्युत्पत्तिरपि इतिहास पदस्य पदव्युत्पत्पत्तेः समानं भाति। पुराणेषु ऐतिहासिकभागः आधिक्येन अस्तीति कारणतः पुराणान्यपि इतिहासाः एव इति मन्तव्यम्। पुराणेषु पूर्वप्रवृत्तवृत्तान्तेभ्यः भिन्नाः विषयाः अपि बहवः भवन्ति। पुराणानि भविष्यत्कालस्यापि बहून् विषयान् प्रतिपादयन्ति। कल्क्यवतारवर्णनं तु भविष्यत्कालस्य सूचनां

करोति । कलियुगे मानवानां प्रवृत्तिः कथं भविष्यति इति विचारः द्वापरान्ते एव व्यासेन पुराणेषु उल्लिखितः दृश्यते ।श्रीमद्भागवतस्य पुरञ्जनोपाख्यानं यथार्थवृत्तान्तं नोपस्थापयति इति स्पष्टतया ज्ञायते । । यद्यपि पुराणेषु ऐतिहासिकविषयाः बहवः भवन्ति तथापि **इतिहास शब्देन वाल्मीकिप्रणीतरामायणस्य,कृष्णद्वैपायनविरचितस्य महाभारतग्रन्थस्य च एव परिगणना क्रियते।**

विष्णुपुराणे मौर्यवंशावलिः, मत्स्यपुराणे आन्ध्रवंशविचारः, वायुपुराणे गुप्तवंशविस्तारः, रामावतारकथा, कृष्णावतारविचारादयः ऐतिहासिकविषयाःउपलभ्यन्ते। रामायणे महाभारते च काश्चन पुराणगाथाः अपि प्रसंङ्गवशात् उक्ताः। अतः इतिहासपुराणयोः परस्परं गाढः सम्बन्धः वरीवर्ति। इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् -इत्यत्र उभयोरपि अविनाभावः उक्तः। श्रीमद्रामायणमहाभारतयोः इतिहासत्वं सर्वैः अङ्गीकृतम् इति कारणतः तयोरेव परिचयः अत्र दीयते।

### 2.2 इतिहासस्य भेदाः, इतिहासस्य प्रयोजनञ्च

रामायणं भारतञ्च इतिहासत्वेन परिगण्येते इतिपूर्वम् उक्तम्। एतौ द्वावपि ग्रन्थौ काव्ये अपि । अतः प्रवृत्तस्य इतिवृत्तकथनमात्रमेव एतयोः प्रयोजनं न । “अपि तु रामवत् वर्तितव्यं न तु रावणादिवत् ”– इत्यादि संदेशज्ञापनमपि कुरुतः। अतः रामायणकर्त्रा वाल्मीकिना,महाभारतकर्त्रा वेदव्यासेन च किं कथनीयं, किं न कथनीयमिति विचार्य लोककल्याणकारकविषयाः एवउपस्थापिताः। लोकापकारकविषयान् लोकक्षेमार्थं गोपितवन्तः। धर्मार्थकाममोक्षाणां चतुर्णामपि पुरुषार्थानां प्रतिपादनं कृतम्। महाभारतस्य विषये व्यासमहर्षिणा एवमुक्तं –

**धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ।**
**यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्।।म.भा** 1.62.53

इति । पुरुषार्थचतुष्टयनिरूपणं महाभारतस्य उद्देश्यम्। धर्मनिरूपणं रामायणस्य लक्ष्यम्। एवं स्पष्टम् उद्देश्यं मनसि निधाय इतिहासग्रन्थौ रचितौ इति स्पष्टम्।

#### 2.2.1 रामायणकर्तुः परिचयः-

श्रीवाल्मीकिमहर्षिः रामायणकाव्यस्स रचयिता। संस्कृतलौकिकवाङ्मयस्य आदिकविः।वेदार्थनिरूपणार्थमेव इदं काव्यं प्रवृत्तम्।

**“वेदवेद्ये परे पुंसि जाते दशरथात्मजे।**

**वेदः प्राचेतसादासीत् साक्षाद्रामायणात्मना।।”**

इति कश्चन प्राचीनश्लोकः रामायणस्य उद्देश्यं रामायणकर्तुः परिचयञ्च करोति। वाल्मीकिः भृगुवंशीयः इति पण्डिताः कथयन्ति । स्कान्दपुराणे अग्निशर्मवृत्तान्तः वाल्मीकिमहर्षेः पूर्ववृत्तान्तं स्पष्टतया विवृणोति।

2.2.2 **रामायणस्य रचनाकालः**

रामायणं वैवस्वतमन्वन्तरस्यचतुर्विंशतितमे महायुगे त्रेतायुगे प्रवृत्तम्। वयम् इदानीं अष्टाविंशे महायुगे स्मः। महाभारतं तु अस्मिन्नेव महायुगे प्रवृत्तम्। अत्र प्रमाणं-

**तृणबिन्दुः त्रयोविंशे वाल्मीकिस्तु परः स्मृतः।**

**ऋक्षोभूत् भार्गवः तस्मात् वाल्मीकिर्योभिधीयते।। विष्णुपुराणम्-**

**3अंशः,अध्यायः**-3

2.2.3**रामायणे काण्डविभागः, प्रतिपाद्यांशाश्च**

रामायणकथा सप्तकाण्डेषु विभक्ता।

1.**बालकाण्डम्**-नारदमुनीन्द्रस्य रामकथोपदेशतः प्रथमः सर्गः आरभ्यते। नारदमुनिः वाल्मीकिमहर्षये रामकथां सक्षेपतः विवृणोति। ततः क्रौञ्चमिथुनकथा,लवकुशयोः रामायणोपदेशः, अयोध्यायां रामसन्निधौ रामकथागानम्, सीताकल्याणपर्यन्तविषयाः वर्तन्ते। परशुरामस्य गर्वभङ्गप्रसङ्गेन बालकाण्डः परिसमाप्यते।

2.**अयोध्याकाण्डम्**- रामपट्टाभिषेकभङ्गः,रामस्य वनवासार्थं गमनम् इत्यादयः विषयाः अत्र वर्तन्ते। विशेषतः धर्मनिरूपकविषयाः अत्र उपस्थापिताः।

3.**अरण्यकाण्डम्**– रामस्य वनवासप्रसङ्गाः, शूर्पणखावृत्तान्तः, जनस्थाने चतुर्दशसहस्रराक्षसानां वधः,सीतापहरणं, सीतान्वेषणारम्भः च।

4.**किष्किन्धाकाण्डम्**- रामसुग्रीवमैत्री, वालिवधः,सीतान्वेषणघट्टः च।

5.**सुन्दरकाण्डम्**- हनूमतः समुद्रलङ्घनम्, लङ्कायां सीतासंदर्शनम्,रावणेन सह संभाषणं,लङ्कादहनं,ततः प्रत्यागमनम्।

6.**युद्धकाण्डम्** – समुद्रे सेतुबन्धनम्, लङ्काप्रवेशः,रामरावणयोर्युद्धं,सीतापरिग्रहः,अयोध्यापुरप्रवेशः, रामपट्टाभिषेकः।

7.**उत्तरकाण्डम्** -इदम् रामायणस्य अनुबन्धभागः, रावणादीनां पूर्ववृत्तान्तः,सीतापरित्यागः,रामस्य अवतारपरिसमाप्तिः।

2.2.4**महाभारतम्** -

महाभारतस्य रचयिता कृष्णद्वैपायनवेदव्यासः। अयं लक्षश्लोकात्मकः ग्रन्थः। अस्य कलियुगस्य पूर्वतने द्वापरयुगान्ते प्रवृत्तः पाण्डवकौरवसंघर्षः प्रधानकथावस्तु। अयं ग्रन्थः अष्टादशपर्वसु विभक्तः।

**महाभारते पर्वणां नामानि**-आदिपर्व, सभापर्व,अरण्यपर्व,विराटपर्व,उद्योगपर्व, भीष्मपर्व,द्रोणपर्व, कर्णपर्व,
शल्यपर्व,सौप्तिकपर्व,स्त्रीपर्व,शान्तिपर्व,अनुशासनपर्व, अश्वमेधपर्व, आश्वासनिकपर्व, मौसलपर्व, महाप्रस्थानपर्व, स्वर्गारोहणपर्व इति।

**महाभारतस्य केचन प्रमुखभागाः-**

1.श्रीमद्भगवद्गीता
2.विष्णुसहस्रनाम
3. विदुरनीतिः
4.यक्षप्रश्नः
5. सनत्सुजातीयम्
6.अनुशासनपर्व इत्यादयः।

**3.पुराणस्य प्रतिपाद्यविषयाः-**

**पुराणस्य पञ्चलक्षणानि कथितानि। तेषां विवरणं संक्षेपेण अवलोकयामः -**

**सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।**
**वंशानुचरितं चेति पुराणं पञ्चलक्षणम् ।।**

जगतः सृष्टिः, प्रलयः, प्रसिद्धराजपरम्परा, मन्वन्तराणि, देवर्षिराजवंशेषु समुत्पन्नानां विशिष्टव्यक्तीनां पावनचरितं च इति पञ्चविषयाः यस्मिन् ग्रन्थे विचारिताः सन्ति तत्पुराणमिति उच्यते।

3.1 **सर्गः** -

जगतः नानापदार्थानां सृष्टिः उत्पत्तिः वा सर्गशब्देन निगद्यते ।

**अव्याकृतगुणक्षोभात् महतास्त्रिवृतोऽहमः ।**
**भूतमात्रेन्द्रियार्थानां सम्भवः सर्ग उच्यते ।। भाग.१२.७.११**

3.2 **प्रतिसर्गः**- प्रतिसर्गः इति पदस्य प्रलयः इत्यर्थः । अयं प्रलयः नैमित्तिकः, प्राकृतिकः, नित्यः, आत्यन्तिकः च इति चतुर्विधो भवति । तद्यथा-

**नैमित्तिकः प्राकृतिको नित्य आत्यन्तिको लयः ।**
**संस्थेति कविभिः प्रोक्ता चतुर्धाऽस्य स्वभावतः । । भाग.३.१०.१४**

3.3 **वंशः** -

भूतभविष्यद्वर्तमानकालेषु विद्यमानानां राज्ञाम् ऋषीणां च वंशवर्णनम् ।
राज्ञां ब्रह्मप्रसूतानां वंशस्त्रैकालिकोऽन्वयः । भाग. १२.७.१६

3.4 **मन्वन्तरम्** -

मन्वन्तरं नाम मनोः कालः । तत्सम्बद्धघटनानां वर्णनं मन्वन्तरे भवति । पौराणिककालगणनार्थं कल्पः चतुर्दशधा विभक्तो वर्तते। विष्णुपुराणे चतुर्दशमनूनां नामानि निगदितानि सन्ति।

१. स्वायम्भुवमनुः २. स्वारोचिषमनुः ३. उत्तममनुः ४. तामसमनुः ५. रैवतमनुः६. चाक्षुषमनुः ७. वैवस्वतमनुः
८. सावर्णिमनुः ९. दक्षसावर्णिमनुः १०. ब्रह्मसावर्णिमनुः ११. धर्मसावर्णिमनुः १२. रुद्रसावर्णिकमनुः १३. रुचिमनुः
१४. भौममनुः

3.5**वंशानुचरितम्**-

ये च वंशप्रतिष्ठाकाराः श्रीरामादयः, तेषां चरितं वंशानुचरितम् । “वंशानुचरितं तेषां वृत्तं वंशधराश्च ये । "

पूर्वोक्तवंशेषु उत्पन्नवंशाधाराणां तथा राज्ञां विशिष्टविवरणं यत्र लभ्यते तद् वंशानुचरितमित्युच्यते। सूर्यस्य तथैव चन्द्रस्य वंशीयानां च राज्ञां चरितमेव पुराणेषु अधिकांशतया वर्णितमस्ति ।

**पुराणदशलक्षणानि** -

श्रीमद्भागवतमहापुराणे पुराणस्य दशलक्षणविषये एवं प्रोक्तमस्ति । तद्यथा-

**सर्गोऽस्याथ विसर्गश्च वृत्तीरक्षान्तराणि च ।**
**वंशो वंशानुचरितं संस्थाहेतुरपाश्रयः । ।**
**दशभिर्लक्षणैर्युक्तं पुराणं तद्विदो विदुः ।**
**केचित् पञ्चविधं ब्रह्मन् ! महदल्पव्यवस्थया ।। भाग.१२.७.१६**

सर्गः, प्रतिसर्गः, वृत्तिः, रक्षा, अन्तराणि, वंशः, वंशानुचरितं, संस्था, हेतुः, अपाश्रयः, इति दशलक्षणानि भागवतपुराणे वर्णितानि सन्ति।

3.6 **सर्गः**-

यदा सृष्टेः समयः भवति तदा महत्तत्त्वं स्वीयगुणैः प्रकाशितं भवति । तद्यथा-

**सर्गकाले प्रधानस्य क्षेत्रज्ञाधिष्ठितस्य वै । गुणभावादासमाने महत्तत्त्वं बभूव हि ।।** ब्र.पु.,३.१३ २०.

3.7 **प्रतिसर्गः**-

सर्गः कारणसृष्टिः भवति। ततः परं विसर्गनाम्नी कार्यसृष्टिः भवति। कारणसृष्टिः
परमात्मा भवति। कार्यसृष्टिः नाम ब्रह्मणा या विविधासृष्टिः विहिता सा एव विसर्गः इति
निगद्यते। यथा एकस्मात् बीजात् द्वितीयबीजम् उत्पद्यते तथा एकस्मात् जीवात् द्वितीयजीवस्य सृष्टिः भवति ।

**पुरुषानुगृहीतानामेतेषां वासनामयः ।**
**विसर्गोऽयं समाहारे बीजाद्बीजं चराचरम् ।।** भाग.१२.७.१२

3.8 **वृत्तिः** -

**जीवानां जीवननिवाससामग्री एव वृत्तिः ।**

**वृत्तिर्भूतानि भूतानां चरणामचराणि च ।**
**कृता स्वेन नृणां तत्र कामाच्चोदनयाऽपि वा ।। भाग.१२.७.१३**

मानवाः जीवनार्थं कानिचन वस्तूनि उपयुज्यन्ते । तान्येव वृत्तित्वेन उच्यन्ते। यथा- तण्डुलः गोधुमः इत्यादयः आहारपदार्थाः सर्वे वृत्तौ अन्तर्गताः भवन्ति । काः चित् वृत्तीः मानवः शास्त्रानुगुणं गृह्णाति काः चित् वृत्तीः स्वीयकामनाद्वारा निश्चिनोति । द्वयोः उद्देश्यम् जीवनसंरक्षणम् इत्येव ।

3.9. **रक्षा-**

प्राणिनां कल्याणाय धर्मसंस्थापनार्थाय च प्रतियुगमपि पशुपक्षिऋषिदेवताद्यनेकरूपेषु भगवान् अवतरति। ततः बहून् शत्रून् राक्षसादीन् संहरति । भगवतः लीला विश्वस्य रक्षार्थमेव। अतः एव सा लीला रक्षा इति नाम्ना निर्दिश्यते।

**रक्षाच्युतावतारेहा विश्वस्यानु युगे युगे ।**
**तिर्यङ्मर्त्यर्षिवेदेषु हन्यन्ते यैस्त्रयीद्विषः ।। भाग.१२.७.१४**

3.10 **मन्वन्तराणि-**

**मन्वन्तरं मनुर्देवाः मनुपुत्राः सुरेश्वरः ।**
**ऋषयोऽशांवताराश्च हरेः षड्विधमुच्यते ।। भाग.१२.७.५**

मनुः, देवाः, मनुपुत्राः, देवेन्द्रः, सप्तर्षयः, भगवदंशावताराः च एते षड् मिलित्वा
मन्वन्तरम् इति निगद्यते ।

3.11 **वंशः** -

वंशो नाम विविधानां राजवंशानां वर्णनम्। पुराणेषु अनेकमहाराजानां वंशानाञ्च वर्णनं विस्तृतरूपेण उपलभ्यते । भागवतपुराणे, अग्निपुराणे एवं विविधेषु पुराणेषु इक्ष्वाकु-निमि-चन्द्र-भरत- कुरुवंशादीनां वर्णनं दरीदृश्यते ।

3.12 **वंशानुचरितम्-**

विभिन्नवंशानां कथा वंशानुचरितमिति कथ्यते । पुराणेषु वंशवर्णनस्य बाहुल्यमस्ति तत्सम्बद्धराजचरितोल्लेखः अपिवर्तते । पुराणेषु ययाति-पृथु-सगर-हरिश्चन्द्र - राम भरतादीनाम् अनेकानां राज्ञां चरितानि विवृतानि ।

**वंशानुचरितं तेषां वृत्तं वंशधाराश्च ये ।**भाग .१२.७.१६

3.13**संस्था-**

संस्था नाम प्रतिसर्गः । ईश्वरः विश्वनिर्माणं कृत्वा प्रत्याहारसमये ग्रसनं कृत्वा अन्ते सृष्टेः संहारं करोति-

**यथेदं कुरुते व्यक्तं सुसूक्ष्मं विश्वमीश्वरः ।**

**अव्यक्तं ग्रसते प्रत्याहारे च कृत्स्नशः ।। ब्र.पु.१०.२**

एवं सृष्टेः समस्ततत्त्वेषु लयः एव संस्था भवति ।

3.14 **हेतुः -**

हेतुः मनुष्यस्य जन्मकारणम्। सृष्टिः भागवतपुराणे हेतुरिति अभिहिता ।

**हेतुर्जीवोऽस्य सर्गादेरविद्याकर्मकारकमः ।**

**यं चानुशयिनं प्राहख्याकृतमृतापरे** ।। भाग.१२.७.१८

3.15 **अपाश्रयः-**

जीवस्य त्रिविधावस्थाः सन्ति । ताः च जाग्रत्स्वप्नसुषुप्त्यादयः । एतादृशासु चैतन्यं निवसति यत्क्रमशः विश्वतैजसप्राज्ञनाम्ना विख्यातम् । मायामयीवृत्तिषु यस्य

साक्षिरूपेण अनुभूतिः वर्तते स एव अपाश्रयः।

**व्यक्तिरेकान्वयो यस्य जाग्रत्स्वप्नसुषुप्तिषु ।**

**मायामयेषु तद्ब्रह्म जीववृत्तिष्वपाश्रयः** ।। भाग.१२.६.१९

4.**सामान्येन इतिहासेषु प्रतिपाद्यविषयाः**

रामायणमहाभारतयोः संदेशः एक एव।

**यान्तं न्यायप्रवृत्तस्य तिर्यञ्चोऽपि सहायताम्। अपन्थानं तु गच्छन्तं सोदरोऽपि विमुञ्चति।।**

इति रामायणस्य सारः केनचित् सुभीषितकारेण उक्तः। व्यासमहर्षिः तु -

**ऊर्ध्व बाहू विरोम्येषः न हि कश्चित् श्रुणोति मे।धर्मादर्थश्च कामश्च स किमर्थं न सेव्यते।।**

इति कण्ठतः एव अवोचत्। यतो धर्मः ततो जयः इति भगवद्गीतायामपि स्पष्टमुक्तम्। रामायणमहाभारतेषु आध्यात्मिकाः, आधिदैविकाः, आधिभौतिकाः विषयाः विस्तृततया उक्ताः। कथास्वारस्यमपि पाठकान् सम्मोहयति।

**5.अवतारतत्त्वानि**

मत्स्यः कूर्मो वराहश्च नारसिंहश्च वामनः। रामो रामश्च कृष्णश्च बुद्धः कल्किः नमोस्तुते।।

5.1 **अवतारस्य बीजम्, अवतारस्य प्रयोजनम्**

**यदा यदा हि धर्मस्य ग्लानिर्भवति भारत। अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्।।**

**परित्राणाय साधुनां विनाशाय च दुष्कृताम् । धर्मसंस्थापनार्थाय संभवामि युगे युगे।।**

भगवद्गीतायां विद्यमानं भगवतः वचनमिदं भगवतः अवतारस्य प्रमुखं कारणम् आविष्करोति।भगवतः अनेके अवताराः भागवतादिपुराणेषु वर्णिताः। तेषु दश अवताराः प्रधानाः। तेषाम् अवताराणां निमित्तानि विविधानि दृश्यन्ते चेदपि तेषां सर्वेषामपि परमप्रयोजनं धर्मरक्षणमेव।

5.3 **मत्स्यावतारः**–दशावतारक्रमे मत्स्यावतारः आदिमः। भगवतः परमभक्तस्य, प्रजारक्षकस्य वैवस्वतमनोः साहाय्यार्थम् भगवान् मत्स्यरूपं धृतवान्। प्रलयकाले नौकायां सर्वविधबीजानां परिरक्षणे प्रवृत्ताय मनवे परमात्मा मत्स्यरूपं धृत्वा साहाय्यमकरोत्। तदा एव मनवे ज्ञानोपदेशमपि अकरोत्। सः उपदेशः मत्स्यपुराणत्वेन प्रसिद्धः अभवत्।

5.4 **कूर्मावतारः**– देवाः दानवाश्च अमृतप्राप्तये क्षीरसमुद्रमथने प्रवृत्ताः। तदा मन्थानरूपेण स्थापितः पर्वतः सागरे निमग्नः अभवत्। देवतानां प्रार्थनाम् अनुसृत्य भगवान् महाविष्णुः कूर्मरूपं धृत्वा स्वस्य पृष्ठे मन्दरगिरिं धृतवान्।

5.5 **वराहावतारः** - हिरण्याक्षप्रभृतीनां वधार्थं महाविष्णुः वराहरूपं धृतवान्। समुद्रे मग्नां भूमिं दंष्ट्रया उद्धृतवान्।

5.6 **नरसिंहावतारः** -हिरण्यकशिपुः हरिभक्तं स्वपुत्रं प्रह्लादं विविधप्रकारैः नाशयितुं प्रायतत्। प्रह्लादरक्षणाय हरिः अपूर्वं नरमृगरूपं धृत्वा राक्षसस्य निग्रहम् अकरोत्। श्रीमद्भागवते नरसिंहावतारकथा विस्तृततया वर्णिता अस्ति।

**अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते।**

**तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम्।।** इति भगवद्वचनस्य प्रतीकरूपमयम् अवतारः।

5.7 **वामनावतारः** – देवताराज्यापहारकं बलिं निग्रहीतुं वामनरूपेण परमात्मा अवतीर्णः। स्वस्य त्रिभिः पादैः भुवनत्रयम् आक्रम्य त्रिविक्रमोऽपि अभवत्।

5.8 **परशुरामावतारः** – लोककण्टकानाम् अधर्मपरायणानां परिपालकानां नाशाय परशुधरः भूत्वा दुष्टनिग्रहम् अकरोत्। अयं परशुधारी रामः परशुरामः इत्येव प्रसिद्धः अभवत्।

5.9 **रामावतारः** – दशरथपुत्रत्वेन अयोध्यायाम् जातः श्रीरामः रावणादि राक्षससंहारेण सह धर्मपालने मार्गदर्शनम् अकरोत्। रामो विग्रहवान् धर्मः इति प्रसिद्धिः वर्तते। रामकथा बहुषु पुराणेषु उपलभ्यते। रामस्य गुणैः आकृष्टः वाल्मीकिः रामायणकाव्यं रचितवान्।

5.10 **कृष्णावतारः** – द्वापरयुगान्ते मथुरायां कृष्णरूपेण श्रीहरिः अवतीर्णः। श्रीमद्भागवतपुराणस्य दशमस्कन्धे श्रीकृष्णस्य बाल्यलीलाः विस्तृततया अभिवर्णिताः। महाभारते तदनन्तरकथा वर्तते। कृष्णावतारः परिपूर्णावतारत्वेन परिगण्यते।

5.11 **बुद्धावतारः** – बुद्धरूपेण राक्षसांशसंभूतानां मोहनार्थं नास्तिकत्वं बोधितवान् इति पुराणानि वदन्ति। बौद्धमतप्रवर्तकः गौतमबुद्धः बुद्धावतारात् भिन्नः इति पौराणिकानां मतम्।

5.12 **कल्की**– अवतारः -कलियुगान्ते अयम् अवतरिष्यति। अधार्मिकान् नाशयित्वा पुनः धर्मप्रतिष्ठापनं करिष्यति।

*****

**संकेताक्षरसूची-**

1. **वि.पु -विष्णुपुराणम्**
2. **भाग. – भागवतपुराणम्**
3. **वा. पु – वायुपुराणम्**
4. **ना.पु -नारदीयपुराणम्**
5. **म.भा – महाभारतम्**
6. **ब्र. पु -ब्रह्मपुराणम्**

## अभ्यासार्थं प्रश्नाः

**लघुप्रश्नाः**

1.पुराणपदस्य अर्थः कः?

2.अष्टादशपुराणानां परिष्कर्ता कः?

3.व्यासस्य माता का?
4. महापुराणानि कति?
5.इतिहासग्रन्थौ कौ?
6.रामायणस्य कर्ता कः?
7.रामायणे कति काण्डानि सन्ति?
8.रामजननकथा कस्मिन् काण्डे वर्तते?
9.हनुमतः विशेषप्राधान्यं फस्मिन् काण्डे दृश्यते?
10.रामरावणयुद्धं कस्मिन् काण्डे वर्णितम्?
11.उपपुराणानि कति?
12.भगवद्गीता कस्मिन् पर्वणि अस्ति?
13.महाभारते कति पर्वाणि सन्ति?
14.महाभारतम् कस्मिन् युगे प्रवृत्तम्?
15.सत्यवती क?
16.दशरथस्य पुत्राः के?
17.रामायणस्य संदेशः कः?
18. पुराणस्य मुख्य लक्षणानि कति?
19.कृष्णकथा कस्मिन् पुराणे वर्णितम् ?
20.भागवतपुराणे कति स्कन्धाः सन्ति?

**लघुटिप्पणिं लिखत-**

1.पुराणानां पञ्चलक्षणानि कानि?
2.पुराणानां दशलक्षणानि कानि?
3.महापुराणानि कानि?
4.पुराणे प्रतिपादितांशाः के?
5.रामायणस्य काण्डानां नामानि लिखत।
6.भागवतपुराणस्य परिचयं लिखत।
7.भगवद्गीताम् अधिकृत्य टिप्पणिं लिखत।
8.वेदव्यासमहामुनेः परिचयं लिखत।
9.वेदार्थज्ञाने पुराणं कथम् उपकरोति।
10.महाभारतस्य अष्टादशपर्वणां नामानि लिखत।

---

**अनुबन्धः -1**

## अष्टादशमहापुराणानांसंक्षिप्तपरिचय : -

अष्टादशमहापुराणानां परिचयः संक्षिप्तरूपेण अत्र दीयते ।

**१. ब्रह्ममहापुराणम्** - ब्रह्मपुराणे दशसहस्रश्लोकाः सन्ति ।

**ब्रह्मणाऽभिहितं पूर्वं यावन्मात्रं मरीचये । ब्राह्मं तद्दशसाहस्त्रं पुराणं तदिहोच्यते । । १ ।।**

एवंप्रकारेण मरीचि : ब्रह्मणा ब्रह्मपुराणं श्रुतवान् । पुराणमिदं द्वाभ्यां भागाभ्याम् अस्ति। पूर्वभागः उत्तरभागः इति। ब्रह्मपुराणे वर्णितविषयाः - सृष्टिकथनं, सूर्यसोमवंशयोराख्यानं, जगन्नाथमाहात्म्यं, पार्वतीशिवयोः विवाहप्रसङ्गः, भगवतः कृष्णस्य चरितं, मार्कण्डेयचरितं, सांख्यदर्शनवर्णनं, पुनः गङ्गागौतमीकृत्तिकातीर्थवर्णनप्रसङ्गेषु विविधतीर्थानां चित्रणम्, उत्कलप्रान्तस्य कोणार्कतीर्थमाहात्म्यं, सूर्यपूजनस्य चर्चा च वर्णितं विद्यते ।

**२. पद्ममहापुराणम्** -

पद्मपुराणस्य विषये प्रायः सर्वत्र श्लोकसंख्या पञ्चपञ्चाशत्सहस्राणि इति कथनं दृश्यते। अग्निपुराणे तु अस्य श्लोकसंख्या द्वादशसहस्राणि इति निर्दिष्टा । मत्स्यपुराणे एवमुक्तम् -

**एतदेव महापद्मे ह्यभूद् हैरण्यमयं जगत् ।**
**तद्वृत्तान्ताश्रयं तद्वत् पाद्ममित्युच्यते बुधैः ।।**
**पाद्मं पञ्चपञ्चाशत् सहस्राणीह पठ्यते ।। ३ ।।**

पुराणमिदं पञ्चखण्डात्मकं विद्यते -

क) सृष्टिखण्डम् ख) भूमिखण्डम् ग) स्वर्गखण्डम् घ) पातालखण्डम् ङ) उत्तरखण्डं च। अस्मिन् पुराणे एकचत्वारिंशदधिकषट्शताध्यायाः (६४१) सन्ति । सृष्टिखण्डे जगदुत्पत्तिवर्णनं विद्यते। भूमिखण्डे भूगोलस्य वर्णनं वर्तते, तत्र सप्तसमुद्राणां, सप्तद्वीपानां सरित्काननपर्वतानां च अस्तित्वं निरूपितम्। स्वर्गखण्डे स्वर्गलोकस्य परलोकसाधनस्य शिवलिङ्गार्चनविधेश्च महत्त्वपूर्णं विवरणं, शकुन्तलोपाख्यानं च लभ्यते । पातालखण्डे रामचन्द्रस्य, श्रीकृष्णस्य च चरितं वर्णितमस्ति । उत्तरखण्डे विविधतीर्थव्रतानां महिमा, नवधाभक्तेः, गृहस्थधर्मस्य, मोक्षप्राप्त्युपायस्य च वर्णनानन्तरं पुराणस्य पाठश्रवणादिफलनिरूपणं प्रतिपादितम्।

**३. विष्णुमहापुराणम्** -

विष्णुमहापुराणे त्रयोविंशतिसहस्रम् श्लोकाः सन्ति । मत्स्यपुराणे उक्तमस्ति यत् वाराहकल्पस्य वृत्तान्तमाश्रित्य महर्षिः पराशरः यान् धर्मान् प्रबोधितवान् तदेव विष्णुपुराणम् ।

**वाराहकल्पवृत्तान्तमधिकृत्य पराशरः । यत् प्राह धर्मानखिलं तदुक्तं वैष्णवं विदुः ।।**
**त्रयोविंशतिसाहस्रं तत्प्रमाणं विदुर्बुधाः । । १ ।।** ( मत्स्य. ५३-१६-१७ .)
विष्णुमहापुराणे भागद्वयं विद्यते - क) पूर्वभागः ख) उत्तरभागः इति । केवलं पूर्वभागे एव षडंशाः वर्तन्ते । विष्णुपुराणे षड्विंशत्यधिकशतमध्यायाः सन्ति । विष्णुपुराणस्य प्रथमे अंशे सृष्टिप्रक्रियायाः वर्णनमस्ति । द्वितीयेंऽशे भूगोलस्यातिविस्तरेण विवेचनं कृतम्। तृतीयेंऽशवर्णाश्रमधर्माणां, सत्कर्तव्यानां वर्णनं दृश्यते । चतुर्थेऽशे सोमवंशश्च वर्णनं, विविधवंशानां वर्णनं विद्यते। पञ्चमेंऽशे श्रीकृष्णस्य वंशवर्णनं विद्यते । षष्ठेंऽशे कलिकालस्य प्रायश्चित्तविधानस्य, योगमार्गस्य, वैष्णवभक्तेश्च वर्णनं विद्यते । विष्णुपुराणे गुप्तवंशस्य विस्तृतं वर्णनमस्ति ।

**४.वायुमहापुारणम्** -

महापुराणानां सूचिषु कुत्रचित् वायुपुराणस्य कुत्रचिच्च शिवपुराणस्य चतुर्थस्थानोल्लेखः कृतः। अस्मिन् पुराणे श्लोकसंख्या चतुर्विंशतिसहस्राणि मन्यते। यथोक्तं मत्स्यपुारणे -
**श्वेतकल्पप्रसङ्गेन धर्मान् वायुरिहाब्रवीत् । यत् तद् वायवीयं स्याद् रुद्रमाहात्म्यसंयुतम् ।।**
**चतुर्विंशतिसाहस्रं पुराणं तदिहोच्यते ।।**
अस्मिन् पुराणे अध्यायानां संख्या द्वादशाधिकशतमस्ति । वायुपुराणे चत्वारः पादाः क) प्रक्रियापादः, ख) अनुषङ्गपादः, ग) उपोद्घातपादः, घ) उपसंहारपादश्च। अस्मिन् पुराणे सृष्टिप्रक्रिया, भौगोलिकद्वीपानां, खगोलस्य, ब्रह्मर्षिवंशानां, श्राद्धकर्मणां, सङ्गीतस्य, प्राचीनराजानां च वर्णनं दृश्यते । पुनः गयातीर्थमाहात्म्यं विशदतया प्रतिपादितम् ।

**५.शिवपुराणं**- श्रीमद्भागवतपद्मविष्णुलिङ्गकूर्मवैवर्तमार्कण्डेयमहापुराणेषु महापुराणानां नामसूचिषु वायुपुराणस्य स्थाने शिवपुराणस्योल्लेखः प्राप्यते । अस्मिन् पुराणे चतुर्विंशतिसहस्राणि श्लोकाः सन्ति । यथा ब्रह्मवैवर्तपुराणे -
**चतुर्वंशतिसाहस्रं शैवं च निरूपितम् ।**
**पुराणमिदं सप्तसु संहितासु विभक्तं वर्तते** – क) विद्येश्वरसंहिता – २५, ख) रुद्रसंहिता - १८९ , ग) शतरुद्रसंहिता - ४२ , घ) कोटिरुद्रसंहिता – ४३, ङ) उमासंहिता - ५७, च) कैलाससंहिता – २३, छ) वायवीयसंहिता - ७६ च । एतासु संहितासु रुद्रसंहिता पञ्चखण्डेषु विभक्ताऽस्ति । य) सृष्टिखण्डम् , र) सतीखण्डम्, ल) पार्वतीखण्डम् , व) कुमारखण्डम्, श) युद्धखण्डम् च।

वायवीयसंहितायामपि द्वौ भागौ स्तः। अ) पूर्वार्द्धम् आ) उत्तरार्द्धं च । अस्य पुराणस्य विद्येश्वरसंहितायां वर्णाश्रमधर्माः, कलिदोषाः, शिवलिङ्गार्चनान्मुक्तिलाभः, भस्मरुद्राक्षधारणमाहात्म्यम्, बिल्वपत्रपुष्पादिभिः शिवपूजनरहस्यं च वर्णितमस्ति । रुद्रसंहितायां निर्गुणस्य शिवस्य शक्तिसम्बन्धेन सृष्टिनिर्माणवर्णनं, ब्रह्माण्डोत्पत्तिः, सतीचरितम्, नानाविधसृष्टिविवेचनं, दक्षयज्ञविध्वंसः, पार्वतीचरितं, कामदहनम्, शिवपार्वत्योः विवाहः, कैलासागमनम्, कार्तिकेयस्य जन्म, तारकासुरयुद्धः, गणेशोत्पत्तिः एवं विविधविषयाणां वर्णनं विद्यते । कोटिरुद्रसंहितायां द्वादशज्योतिर्लिङ्गानां विस्तरेण माहात्म्यप्रतिपादनम्, अनसूयातपोवर्णनं च कृतम्। उमासंहितायां पुत्रप्राप्तये श्रीकृष्णस्य तपश्चर्या, नरकपातालवर्णनम्, स्वायम्भुवादिमनुवंशस्य वर्णनम्, देवीचरितं च वर्णितमस्ति । कैलाससंहितायां मन्त्रदीक्षाग्रहणम्, विरजाहोमादीनां वर्णनम्, ततः प्रत्यभिज्ञादर्शनस्य सिद्धान्ताः वर्णिताः। वायवीयसंहितायां शैवतन्त्रात्मिकायाः पूजापद्धतेर्वर्णनं शैवागमसिद्धान्तनिरूपणादीनि च वर्णितानि।

**५.श्रीमद्भागवतमहापुराणम्-**

भागवतपुराणं संस्कृतजगति एव उत्तमं रत्नमिति वक्तुं शक्यते । पुराणे अस्मिन् द्वादशस्कन्धाः (१२), अष्टादशसहस्रश्लोकाः (१८,०००) ३३२ अध्यायाः च सन्ति । तत्परिचयः एवं विद्यते ।

**यत्राधिकृत्य गायत्रीं वर्ण्यते धर्मविस्तरः । वृत्तासुरवधोपेतं तद् भागवतमुच्यते ।।**

**तद् वृत्तान्तोद्भवं लोके तद् भागवतमुच्यते ।। १ ।।** मत्स्य. ५३/१०-१२

अत्र अस्मिन् पुराणे गायत्र्या समारभ्य वृत्रासुरवधाख्यानम्, हयग्रीवब्रह्मविद्या, सास्वतस्य कल्पस्य राज्ञां चरित्राणि च वर्णितानि सन्ति । तादृशानां विषयानां वर्णनं कुत्र विद्यते तत् भागवतपुराणमिति कथ्यन्ते । अस्य वक्ता व्यासपुत्रः शुकदेवः, श्रोता चाऽस्ति परीक्षित्। प्रथमस्कन्धे सूतमहर्षीणां समागमः, व्यासचरितं पाण्डुचरितं परीक्षिदुपाख्यानानि वर्णितानि । सृष्टिप्रकरणम्, कपिलसांख्यदर्शनं चोपलभ्यते । चतुर्थस्कन्धे सतीचरितम्, ध्रुवचरितम्, पृथूपाख्यानं च प्रतिपादितानि । पञ्चमस्कन्धे प्रियव्रतचरितम्, भूगोलादिवर्णनम्, नरकादीनां च वर्णमुपलभ्यते । षष्ठस्कन्धे अजामीलकथा, दक्षसृष्टिनिरूपणम्, वृत्रासुरकथा, मरुत्कथा च कीर्तिताः । सप्तमस्कन्धे प्रह्लादचरितवर्णाश्रमधर्मनिरूपणादीनि वर्णितानि । अष्टमस्कन्धे गजेन्द्रमोक्षकथा, मन्वन्तरनिरूपणम्, बलिबन्धनम्, तन्निबन्धनम्,

मत्स्यावतारकथा च निरूपितानि। नवमस्कन्धे सूर्यसोमवंशनिरूपणे श्रीरामचरितम्, परशुरामचरितम्, ऐलोपाख्यानम् इत्यादीनि वर्णितानि। दशमस्कन्धे श्रीकृष्णस्य जन्मतः सर्वं वृत्तान्तं विस्तरेण वर्णितम् । एकादशस्कन्धे यदुकुलशापः, यदुकुलनाशः, भागवतधर्मनिरूपणम्, अध्यात्मविद्यावर्णनम्, श्रीकृष्णस्य स्वधामगमनं च प्रतिपादितानि । द्वादशस्कन्धे कलियुगजातानां नृपतीनां वंशनिरूपणम्, युगधर्मवर्णनम्, कल्क्यवतारकथनम्, प्रलयवर्णनम्, परीक्षिन्मोक्षः, मार्कण्डेयचरितम्, वेदशाखया महापुराणनाम-सङ्ख्ययोश्च निरूपितं वर्तते ।

**६. नारदीयमहापुराणम् -**

नारदपुराणे भागद्वयं विद्यते, पूर्वभागः, उत्तरभागश्च । तत्र पूर्वभागे चत्वारः पादाः १२५ अध्यायाः, उत्तरभागे च ८२ अध्यायाः सन्ति, संकलनाय अत्र २०७ अध्यायाः सन्ति। अत्र श्लोकाः पञ्चविंशतिसहस्र (२५,०००) मस्ति। एतत्परिचयश्चैवं विद्यते -

**यत्राह नारदो धर्मान् बृहत्कल्पाश्रयानिह । पञ्चविंशत् सहस्राणि नारदीयं तदुच्यते ।।** मत्स्य. ५३-२३

नारदीयपुराणे वर्णाश्रमाचारः, श्राद्धप्रायश्चित्तादिविधानम्, विष्णुरामहनुमत्कृष्णकालीशिवादि देवतानां मन्त्रानुष्ठानविधिश्च वर्णिताः । एतदतिरिक्तं भारतीयानामनेकविद्यानां ज्ञानाय पुराणमिदं बहूपयोगी दृश्यते । यतः अस्मिन् पुराणे गणित, ज्योतिष, व्याकरण, निरुक्त, छन्दसां च अतिविस्तरेण वर्णनं साङ्गोपाङ्गमुपलभ्यते । इदं पुराणं वैष्णवसम्प्रदायस्य माहात्म्यं पाञ्चरात्रागमस्य सिद्धान्तांश्च वर्णयति । अस्य पुराणस्य कालः षष्ठसप्तमशताब्दयोरनन्तरमेव भवितुमर्हति ।। १।।

**७. मार्कण्डेयमहापुराणम् –**

अस्मिन् पुराणे खगानुद्दिश्य मार्कण्डेयमुनिना धर्माधर्मादीनां विचारणा कृता । अत्र १३४ अध्यायाः, ९,० ० ० श्लोकाः च सन्ति ।

**यत्राधिकृत्य शकुनीन्धर्मान्धर्म्मविचारणान् । व्याख्याता वै मुने! प्रश्ना मुनिभिर्धर्मचारिभिः ।।**

**मार्कण्डेयेन कथितं तत्सर्वं विस्तरेण तु । पुराणं नवसाहस्त्रं मार्कण्डेयमिहोच्यते ।।**

१. पुराणविमर्शः - पृ-५५० २. मत्स्य - ५३।२५-२६।)

पुराणेऽस्मिन् पक्षिणां जन्मनिरूपणम्, नलस्य तीर्थयात्रा, हरिश्चन्द्रकथा, दत्तात्रेयकथा, हैहयचरितं च वर्णितानि। पुनः मदालसायाः चरितं

जगत्प्रख्याता दुर्गासप्तशतीत्रयोदशाध्यायेष्वस्मिन्नेव पुराणे प्राप्यते । मार्तण्डस्य जन्मकथा, वैवश्वतवंशनिरूपणम्, नरिष्यन्तस्य चरितं चास्मिन् पुराणे समुपलभ्यत् ।

**८. अग्निमहापुराणम् -**

अग्निपुराणम् अग्निना वसिष्ठाय प्रबोधितम् । तत्र षोडश सहस्राणां श्लोकाः सन्ति । अस्य पाठनेन श्रवणेन च सर्वाणि पापानि दूरीभवन्ति। अत्र विविधानाम् अद्भुतचरित्राणां चित्रणं वर्तते -

**यत्तदीशानकं कल्पवृत्तान्तमधिकृत्य च । वसिष्ठायाग्निना प्रोक्तमाग्नेयं तत् प्रचक्षते ।।**

**तच्च षोडश साहस्रं सर्वक्रतुफलप्रदम् ।।१** (१. म.पु.५३/२८ )

अस्य पुराणस्य वक्ता अग्निः, श्रोता च महर्षिः वसिष्ठः अस्ति । अत्र ईशानकल्पस्य कथा विद्यते। अग्निपुराणे लोकजनानां कृते शिक्षणार्थं विविधविद्यानां प्रसङ्गः दृश्यते । अत एव इदं पुराणं भारतीयसमस्तविद्यानां कोशः इति कथ्यन्ते । अस्य पुराणस्य उद्देश्यं तु जनानां कृते विविधानां विद्यानां प्रसारणमेव । अस्मिन् पुराणे ३८३ अध्यायाः सन्ति । अत्र अवतारत्वेन सह रामायणस्य, महाभारतस्य, हरिवंशस्य च कथानां साराः दृश्यन्ते । अग्निपुराणस्य प्रथमेऽध्याये भगवतः विष्णोः वैशिष्ट्यवर्णनानन्तरं, द्वितीयाध्यायतः मत्स्यकूर्मादि दशावताराणां वर्णनम् उपलभ्यते । तत्र श्रीरामावतारवर्णने बलिवधानन्तरं किष्किन्धाराज्यमवाप्य सीतान्वेषणे विलम्बं कुर्वाणं सुग्रीवं सन्देष्टुं लक्ष्मणं प्रेषयामास श्रीरामः । तदानीं लक्ष्मणः एवमुवाच-

**तदाऽब्रवीत्तं रामोक्तं लक्ष्मणो व्रज राघवम् । न च संकुचितः पन्था येन वाली हतो गतः ।।**

**समये तिष्ठ सुग्रीव मा वालिपथमन्वगाः । ।** (२. अग्नि. ८/६/१,२ )

एवमनन्तरं सीताहरणप्रसङ्गे रावणमारीचयोः प्रश्नोत्तरे मारीचस्य चिन्तनं तु श्लाघनीयमेव ।

**मारीचो रावणं प्राह रामो मृत्युर्धनुर्धरः । रावणादपि मर्तव्यं मर्तव्यं राघवादपि ।**

**अवश्यं यदि मर्तव्यं वरं रामो न रावणः । ।**' (१. अग्नि. ७ - १४, १५.)

एवम् अनन्तराध्यायेषु हरिवंशस्य वर्णनं, महाभारतस्य वर्णनं दृश्यते । तत्र कुरुक्षेत्रयुद्धादनन्तरं त्रयोः दुर्योधनपक्षीयाः, सप्त च पाण्डवपक्षीयाः अवशिष्ठाः इति उक्तम्। अग्निपुराणस्थमहाभारते एवं दृश्यते -

**कृतवर्मा कृपो द्रौणिस्त्रियो मुक्तास्ततो रणात् । पाण्डवाः सात्यिकिः कृष्णः सप्त मुक्ता न चापरे ।। २** (२. अग्नि.१३।२४)

एवमेव अग्निपुारणस्यान्ते माहात्म्यवर्णनावसरे

**सर्वे मत्स्यावताराद्या गीता रामायणं त्विह । हरिवंशो भारतं च नव सर्गाः प्रदर्शिताः ।। ३** (३. अग्नि. ३८२ ।५२ ४. अग्नि. ३९/१३ )

अस्मिन् पुराणे ३७९ अध्याये च भगवतः अर्थवर्णनमपि किञ्चित् दृश्यते।

**उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिम् । वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति ।**

अत्र अनेकविधमन्दिरनिर्माण - गृहशिल्पकलानां निरूपणेन सह मूर्तिप्रतिष्ठा पूजाविधानं च विस्तृततया वर्णितमस्ति । चतुर्णामुपवेदानां वेदाङ्गानां तथा दार्शनिकविषयाणाञ्च दिग्दर्शनेनातिरिक्तं पशुचिकित्सा - रत्नपरीक्षा - वास्तुविद्या - ज्योतिष - धर्मशास्त्र - राजनीति - आयुर्वेदादिशास्त्राणां वर्णनं विशेषरूपेण उपलभ्यते । काव्यस्य सुन्दरनिरूपणेन सहालङ्कारशास्त्रस्य विवेचनं महात्या मार्मिकरीत्या कृतमस्ति। छन्दः शास्त्रस्य निरूपणं, व्याकरणस्यान्क्षणमपूर्वं विद्यते । कौमारव्याकरणनाम्ना व्याकरणं, एकाक्षरकोशः, नामलिङ्गा- नुशासनम्, योगाभ्यासस्य यमनियमासनादीनामष्टाङ्गनां विवेचनं दृश्यते । पुनः अद्वैतवेदान्तसारः, गीतायाः सारांशः, भारतीयसाहित्यस्य विषयाणां वर्णनं बहुधा बहुत्र दृश्यते।

तदर्थमेव - **नास्मात् परतरं भूमौ विद्यते वस्तु दुर्लभम् । आग्नेये हि पुराणेऽस्मिन् सर्वा विद्या प्रदर्शिताः ।** ' (१. अग्नि. ३६३/५१)

एवमग्निपुराणस्य ३८३ अध्यायेषु वेदवेदाङ्गार्थशास्त्रायुर्वेदगान्धर्ववेदादीनां विषयाः अत्युत्तमतया निरूपिताः सन्ति । तथा हिन्दूसाहित्य - संस्कृतिप्रभृतीनामुपयोगिनः विषयाः समाविष्टाः सन्ति । एकस्मिन् पुराणे सर्ग - प्रतिसर्गवर्णनेन सह अनेकतन्त्र - मन्त्र - योगप्रक्रिया – दान-व्रतोपवासाभिषेक - देवताप्रतिष्ठा - वर्णाश्रमव्यवस्था - नानाव्यवहाराः वास्तुविद्या - राजधर्म - राजनीतिविषयकज्ञान - युद्धोपयोगिनामास्त्राणां वर्णनं, तिथि - वार - नक्षत्रसामुद्रिकविज्ञानस्त्री-पुरुषलक्षण – मृतसञ्जीवनीप्रयोगसम्मोहनोच्चाटनादि-सम्बन्धिविषयमणिमाणिक्यादिपरीक्षण- ज्ञानविषयः - औषधप्रयोगः सर्वशास्त्रनिरूपणम्, चतुष्षष्टिकलाः साङ्गोपाङ्गनिरूपणादीनां विषयानां वर्णनं विपुलतया उपलभ्यते । अग्निपुराणेऽनेकेषां तान्त्रिकाणामनुष्ठानानामुल्लेखात् तदर्थम् अग्निपुराणस्य उत्पत्तिः प्रदेशः वङ्गदेशः इति केषाञ्चन

विदुषामभिप्रायमः । अग्निपुराणस्य पठनेन, श्रवणेन मोक्षप्राप्तिम् अवश्यं प्राप्स्यामः इति एवमुक्तम्।

**अग्निनोक्तं पुराणं यदाग्नेयं वेदसम्मितम् । भुक्तिमुक्तिप्रदं पुण्यं पठतां शृण्वतां नृणाम् ।।' इति** । (१. अग्नि. १ - १० )

एवं प्रकारेण अग्निपुराणं संस्कृतजगति विविधविद्यानां कोशः इति वक्तुं शक्यते । मम विषयः अग्निपुराणे चिकित्साशास्त्रम् - एकमध्ययनम् इति । विषयसम्बन्धि अंशाः अग्निपुराणे १४१,१४२, २७८-२९४ अध्यायेषु बहुधा उपलभ्यन्ते ।

**९. भविष्यमहापुराणम् -**

अस्मिन् पुराणे पञ्चपर्वाणि सन्ति। १) ब्रह्मपर्व, २) वैष्णवपर्व, ३) शैवपर्व, ४) सौरपर्व, ५ ) प्रतिसर्गपर्व । अत्र ६०५ अध्यायाः सन्ति । मत्स्यपुराणानुसारेण अस्मिन् पुराणे (१४,५ ० ०) श्लोकाः सन्ति । अस्मिन् पुराणे बाहुल्येन भविष्यच्चरित्रं चर्चितमस्ति ।

यथा - **यत्राधिकृत्य माहात्म्यमादित्यस्य चतुर्मुखः । अघोरकल्पवृत्तान्तप्रसङ्गेन जगत्स्थितिम् ।।**

**मनो कथयामास भूतग्रामस्य लक्षणम् । चतुर्दशसहस्राणि तथा पञ्चशतानि च ।**

**भविष्यचरितप्रायं भविष्यं तदिहोच्यते ।।**

अस्मिन् महापुराणे ब्रह्मपर्वणि सृष्ट्यादिसंस्कारादीनां लक्षणं वर्णितम् । वैष्णवशैवसौरपर्वसु धर्मार्थकाममोक्षाणां प्राप्तये विष्णुशिवसूर्यादीनां पूजनानुष्ठानानि वर्णितानि । प्रतिसर्गपर्वणि नानाख्यानानामपि विवेचनमुपलभ्यते। भविष्यपुराणेऽनेकभविष्य-कालघटनानामपि कृत उल्लेख इति केषाञ्चिद् विदुषां मतम् । परन्तु नैतत्सत्यम् । समये समये पुराणेऽस्मिन् विविधांशा योजिताः।

**१०. ब्रह्मवैवर्तमहापुराणम् -**

ब्रह्मवैवर्ते चत्वारः खण्डाः सन्ति। (१.) ब्रह्मखण्डः - ३० (२.) प्रकृतिखण्डः ५७ (३.) गणेशखण्डः -४६ (४.) श्रीकृष्णजन्मखण्डश्च - १३३ । तत्रान्ते भागद्वयमस्ति, पूर्वभागः उत्तरभागश्च। एतस्य श्लोकसंख्या - १८,००० अस्ति। यत्र सावर्णिमनुना देवर्षये नारदाय रथन्तरकल्पवृत्तान्तमधिकृत्य श्रीकृष्णस्य ब्रह्मवराहस्य च चरितं वर्णितं तत्पुराणं ब्रह्मवैवर्तपुराणमित्युच्यते।

यथा - **रथन्तरस्य कल्पस्य वृत्तान्तमधिकृत्य च । सावर्णिना नारदाय कृष्णमाहात्म्यमुत्तमम् ।।**

**यत्र ब्रह्मवराहस्य चरितं वर्ण्यते मुहुः । तदष्टादशसाहस्रं ब्रह्मवैवर्त्तमुच्यते ।।** मत्स्य. ५३/३०,३१ )

अस्य व्युत्पत्तिः शिवपुराणे एवमस्ति – १. विवर्तनाद् ब्रह्मणस्तु ब्रह्मवैवर्तमुच्यते । २, ब्रह्मखण्डे श्रीकृष्णद्वारा जगतः सृष्टेर्वर्णनं कृतमस्ति । अस्मिन् खण्डे " आयुर्वेदस्यापि" वर्णनमुपलभ्यते। प्रकृतिखण्डे दुर्गासावित्रीलक्ष्मीसरस्वतीराधानां चरित्राणि वर्णितानि। एताः देव्याः समये समये स्वकीयरूपं परिवर्त्य प्रकृत्यनुरूपं विविधावताररूपत्वेन कुर्वन्ति भगवतः कृष्णस्यादेशादिति लिखितम्। अत्र सावित्री, तुलस्योः कथाः बहुविस्तरेण चर्चिताः। गणेशखण्डे गणेशस्य चरितमस्ति। अत्र गणेशः श्रीकृष्णस्यावताररूपत्वेन प्रदर्शितः। श्रीकृष्णजन्मखण्डे श्रीकृष्णस्य जन्मादिचरितं बहुधा वर्णितम् । अत्र अधिकतया राधायाः वर्णनं दृश्यते ।

**११. लिङ्गमहापुराणम्** -

लिङ्गपुराणे द्वौ भागौ स्तः। अत्र पूर्वभागः (१०३), उत्तरभागश्च(५५)। आहत्य १ ६ ३ अध्यायाः सन्ति । अत्र श्लोकाः ११,००० सन्ति । यस्मिन् पारणे अग्निमयलिङ्गस्थितेन महेश्वरेणाग्निकल्पवृत्तान्तमधिकृत्य धर्मार्थकाममोक्षाणां वर्णनं कृतं तदेव लिङ्गपुराणमिति नाम्ना प्रसिद्धम्। १. मत्स्य - ५३/३३,३४ २. शिव. उमासंहितायाम् ४४-१३२

**यत्राग्निलिङ्गमध्यस्थः प्राह देवो महेश्वरः । धर्मार्थकाममोक्षार्थमाग्नेयमधिकृत्य च ।।**

**कल्पान्ते लिङ्गमित्युक्तं पुराणं ब्रह्मणा स्वयम् । तदेकादशसाहस्रं फाल्गुन्यां यः प्रयच्छति ।।** मत्स्य. ५३/३६, ३७

अस्मिन् पुराणे विष्णुशिवयोः प्रशंसा कृता वर्तते । शिवस्य, शिवलिङ्गस्य च पूजापद्धतिः सम्यग्रूपेण वर्णिताऽस्ति। पुनः शैवतीर्थव्रताश्राद्धादीनां वर्णनम् अधिकतया दृश्यते। अत्र भगवतः शिवस्याष्टाविंशत्यवताराणां तत्कथानां च विस्तरेण वर्णनमुपलभ्यते।

**१२. वाराहमहापुराणम्**

वराहपुराणे भागद्वयमस्ति, पूर्वभागः, उत्तरभागः च इति । अत्र २१८ अध्यायाः सन्ति । अत्र २४,० ० ० संख्यात्मकश्लोकाः सन्ति। यस्मिन् पुराणे महावराहस्य माहात्म्यमधिकृत्य मानवकल्पस्य वृत्तान्तः भगवता विष्णुना पृथिव्यै कथितः, तदेव वराहमहापुराणमुच्यते ।

यथा - **महावराहस्य पुनर्माहत्म्यमधिकृत्य च । विष्णुनाऽभिहितं क्षोण्यै तद्वाराहमुच्यते ।।**

**मानवस्य प्रसङ्गेन कल्पस्य मुनिसत्तमाः । चतुर्विंशत्साहस्राणि तत्पुराणमिहोच्यते ।।** मत्स्य. ५३/३८,३९

इदं पुराणं वैष्णवपुराणम्। अस्मिन्नेव पुराणे एव विष्णुविषयाः अधिकतया उपलभ्यन्ते। प्रत्येकमासस्य द्वादशीव्रतानां वर्णमुपलभ्यते । पुनः महिषासुरादिवधप्रसङ्गे देव्याश्चरितमपि वर्णितम्। मथुरापुर्याः माहात्म्यम्, नचिकेतोपाख्यानप्रसङ्गे स्वर्गनरकादीनां विशेषवर्णनमुपलभ्यते ।

**१३. स्कान्दमहापुराणम्**

स्कान्दपुराणे नारदीयपुराणानुसारं सप्तखण्डाः सन्ति । १. माहेश्वरखण्डः - १७४ . २. वैष्णवखण्डः – १५३, ३. ब्रह्मखण्ड - ८७, ४. काशीखण्ड - १०० , ५. अवन्तीखण्डः - ३८७ , ६ . नागरखण्डः – २७१, ७. प्रभासखण्डः - ४२१ च। आहत्य १६७१ अध्यायाः सन्ति । यस्मिन् पुराणे षण्मुखेन तत्पुरुषकल्पप्रसङ्गेऽनेकमहेश्वरधर्मानाश्रित्य चरिताख्यानं कथितं तदेव महापुराणं स्कन्दमिति उच्यते -

**यत्र महेश्वरान् धर्मानधिकृत्य च षण्मुखः । कल्पे तत्पुरुषे वृत्ते चरितैरुपबृंहितम् ।।**

**स्कान्दं नाम पुराणं तदेकाशीति निगद्यते । सहस्राणि शतं चैकमिति मर्त्येषु पठ्यते ।।** १ मत्स्य. ५३ / ४१,४२ )

माहेश्वरखण्डे पार्वतीमहेश्वरयोः विधिलीलानां वर्णनं दृश्यते । स्कन्दमहापुराणस्य वैष्णवखण्डे जगन्नाथपुर्याः, श्रीजगन्नाथपूजाविधिः, प्रतिष्ठाविधिः तत्कथादिचरित्राणि च वर्णितानि । ब्रह्मखण्डे उज्जयिन्यां महाकालस्य प्रतिष्ठायाः, पूजायाश्च विशेषरूपेण वर्णितम् । काशीखण्डे काश्याः माहात्म्यम्, काश्यां देवतानां शिवलिङ्गानामाविर्भावस्य माहात्म्यस्य च प्रतिपादनं कृतम्। अवन्तीखण्डे नर्मदोत्पत्तिः, तत्रस्थानां तीर्थानां, उज्जयिन्यां विविधशिवलिङ्गानां माहात्म्यं च दृश्यते। नगरखण्डे तापीनद्यास्तटे वर्तमानानाम् अनेकेषां तीर्थानां वर्णनं दृश्यते । प्रभासखण्डे प्रभासक्षेत्रस्थानां विविधतीर्थानां देवतानां शिवलिङ्गानां च वर्णनं, माहात्म्यं च उपलभ्यते।

**१४. वामनपुराणम्** -

वामनपुराणे द्वौ भागौ स्तः पूर्वभागः, उत्तरभागश्च नारदीयपुराणानुसारेण उत्तरभागस्य बृहत्वामनमपि नामास्ति। अत्र चतस्रः संहिताः सन्ति। माहेश्वरी, भागवती, सौरी, गणेशरी च । अत्र १५ अध्यायाः सन्ति । एतत् १०,००० संख्याकमस्ति । यत्र ब्रह्मा त्रिविक्रमस्य माहात्म्यमधिकृत्य त्रिवर्गस्य विषयाणां वर्णनं चकार तत् पुराणं वामनमिति कथ्यते ।

**त्रिविक्रमस्य माहात्म्यमधिकृत्य चतुर्मुखः । त्रिवर्गमभ्यधात् तच्च वामनं परिकीर्तितम् ।।**
**पुराणं दशसाहस्रं कूर्मकल्पानुगं शिवम् ।।**' (१.मत्स्य. ५३।४४,४५ )
वामनपुराणे शरद्वर्णनम्, दक्षयज्ञे सत्याः शरीरत्यागः, शिवविवाहः, गणेशोत्पत्तिः, कार्तिकेयचरितम्, प्रह्लादस्य नरनारायणाभ्यां युद्धवर्णनम्, दानमहिमा, भुवनकोशे भारतवर्षीयवननदीपर्वतादीनां वर्णनम्, कात्यायिनी प्रादुर्भावः, महिषासुरादीनां वधः, अन्धकासुरोत्पत्तिः, वामनावतारश्चेति विषयाः वर्तन्ते ।

**१५. कूर्ममहापुराणम्** -

कूर्मपुराणेऽपि भागद्वयं विद्यते, पूर्वभाग, उत्तरभागश्च । तत्रोत्तरभागे चतस्रः संहिताः सन्ति । (१.) ब्रह्मसंहिता (२.) भागवतीसंहिता (३.) सौरीसंहिता (४.) वैष्णवीसंहिता च। तत्रापि भागवतीसंहितायां पञ्चपादाः सन्ति । अत्र पूर्वभागे ५ ३, उत्तरे च ४६ संकलनया ९ ९ अध्यायाः सन्ति। नारदीयपुराणानुसारेण १७,००० श्लोकाः सन्ति । यत्र कूर्मरूपी जनार्दनः सुरपतिः सन्निधानवृषीन् प्रति लक्ष्मीकल्पानुगम् इन्द्रद्युम्नप्रसङ्गेन धर्मार्थकाममोक्षाणां माहात्म्यं वर्णयामास तदेव कूर्ममिति कथ्यते -
**यत्र धर्मार्थकामानां मोक्षस्य च रसातले । माहात्म्यं कथयामास कूर्मरूपी जनार्दनः । ।**
**इन्द्रद्युम्नप्रसङ्गेन ऋषिभ्यः शक्रसन्निधौ । अष्टादशसहस्राणि लक्ष्मीकल्पानुषङ्गिकम् ।।**१( १. मत्स्य. ५२/४६-४७ )
अस्मिन् पुराणे पूर्वभागे लक्ष्मीन्द्रद्युम्नसंवादः, वर्णाश्रमाचारः, सृष्टिप्रकरणम्, पार्वत्यास्तपश्चर्या, भृगुवंशवर्णनम्, दक्षयज्ञविध्वंसः, युगधर्मनिरूपणम्, काशीप्रयागयोर्माहात्म्यं च विस्तरेण वर्णितानि। अस्य पुराणस्योत्तरभागे ईश्वरव्यासगीते कथिते स्तः । अत्र शैवदर्शनानुकूलं पाशुपतयोगस्य वर्णनमस्ति । ततः सदाचारस्य प्रतिपादनं भोजनस्य प्रकारनिरूपणं वर्णितम्।

**१६. गरुडमहापुराणम्** -

गरुडपुराणे खण्डद्वयं विद्यते, पूर्वखण्डः (२४०), उत्तरखण्डश्च (७८) । तत्रोत्तरखण्डस्य प्रेतकल्प इत्यपि नामास्ति । यत्र शरीरत्यागानन्तरं परलोकगामिनां जीवानां विवरणं सविस्तरं प्रतिपादितमस्ति । अत्र क्रमशः २४०, ७८ आहत्य ३१८ अध्यायाः सन्ति । नारदीयपुराणानुसारेण १९,००० श्लोकाः सन्ति । यस्मिन् महापुराणे गारुडकल्पप्रसङ्गे विश्वभाण्डाद्

गरुडोद्भवमधिकृत्य भगवान् विष्णुवृत्तान्तान् कथयामास, तत् पुराणं गरुडमिति कथ्यते । मत्स्यपुराणे-

**यदा च गरुडे कल्पे विश्वाण्डाद् गरुडोद्भवम् ।अधिकृत्याब्रवीद्विष्णुः गारूडं तदिहोच्यते ।।**

**तदष्टादशकं चैव सहस्राणीह पठ्यते ।।**

अत्र विविधानां विद्यानां वर्णनमुपलभ्यते। विष्ण्वादिदेवानां पूजाविधिः, स्त्रोत्राणि च वर्णितानि। रत्नानां परीक्षणम्, नीतिवर्णनम्, आयुर्वेदकथनम्, पशुचिकित्सा, छन्दः शास्त्रम्, व्याकरणशास्त्रम्, गीतामाहत्म्यम्, विभिन्नानि व्रतानि, मन्त्राः तान्त्रिकक्रियाश्च वर्णिताः उपलभ्यन्ते । उत्तरखण्डे जीवस्य गर्भावस्था नरकस्य च वर्णनम्, यमपुर्याः मार्गः, प्रेतानां वासस्थानम्, प्रेतलक्षणं, प्रेतानां स्वरूपाणि, प्रेतानां गतिः, प्रेतयोनिमुक्त्युपायः, मनुष्याणामायुः, यमलोकस्य विस्तारः, सपिण्डीकरणम्, श्राद्धवृषोत्स्वर्गविधानानि च विस्तृतरूपेण वर्णितानि ।

**१७. मत्स्यमहापुराणम्**

मत्स्यपुराणे २९० अध्यायाः सन्ति । १४,००० श्लोकाः सन्ति । यत्र मत्स्यरूपी जनार्दनः मनुं प्रति सप्तकल्पवृत्तामाश्रित्य श्रुतीनां प्रवृत्त्यर्थं नरसिंहस्य वर्णनं कृतवान् तत् पुराणं मत्स्यमिति कथ्यते -

**श्रुतीनां यत्र कल्पादौ प्रवृत्यर्थं जनार्दनः । मत्स्यरूपेण मनवे नरसिंहोपवर्णनम् ।।**

**अधिकृत्याऽब्रवीत् सप्तकल्पवृत्तं मुनीश्वराः । तन्मात्स्यमिति जानीध्वं सहस्राणि चतुर्दश ।।** १ (१. मत्स्य. ५३/५२,५३ )

अस्मिन् पुराणे मनुमत्स्यसंवादः, मानसीसृष्टिः, मैथुनीसृष्टिः, ब्रह्मणः सरस्वत्याश्च चरित्रम्, पृथुययात्योश्च चरितम्, सोमसूर्यवंशवर्णनम्, व्रतविधानम्, प्रयागमाहात्म्यम्, शाकद्वीपानां वर्णनम्, युगविवरणम्, नारदोपाख्यानम्, देवासुरसंग्रामः, नर्मदामाहात्म्यम्, सावित्र्युपाख्यानम्, राजधर्मवर्णनम्, गृहनिर्माणम्, सामुद्रिकज्ञानम्, प्रतिमाविधानम्, श्राद्धकल्पं चेति विषयाः प्रतिपादिताः । पुनः वारणास्याः माहात्म्यम्, तारकासुरवधः, शिवेन सह त्रिपुरासुरयुद्धं च विस्तरेण वर्णितम्। अनन्तरं मूर्तिपूजनश्राद्धदानादीनां विधिः, ब्राह्मणधर्मश्च नितरां वर्णितोऽस्ति।

**१८. ब्रह्माण्डमहापुराणम्** -

अस्मिन् पुराणे चत्वारः पादाः सन्ति । १. प्रक्रियापादः २ . अनुषङ्गपादः ३. उपोद्घातपादः ४. उपसंहारपादश्च । तत्र प्रथमं पादद्वयं पूर्वभाग उच्यते,

तृतीयपादो मध्यमभागः कथ्यते, चतुर्थपादः उत्तरभागः इति । अत्र १६१ अध्यायाः सन्ति। अत्र १२,००० श्लोकाः सन्ति । यस्मिन् पुराणे ब्रह्माण्डमाहात्म्यमधिकृत्य भविष्यकल्पवृत्तान्तं विस्तरेण ब्रह्मा कथयामास तदेव पुराणं ब्रह्माण्डपुराणमित्युच्यते -

**ब्रह्मा ब्रह्माण्डमाहात्म्यमधिकृत्याऽब्रवीत् पुनः । तच्च द्वादशसाहस्रं ब्रह्माण्डं द्विशताधिकम् ।।**

**भविष्याणां च कल्पानां श्रूयते यत्र विस्तरः । तद् ब्रह्माण्डपुराणं च ब्रह्मणा समुदाहृतम् ।।**'(१. मत्स्य. ५३/४९,५० )

अत्र विश्वस्य भौगोलिकविवरणं विशदतयोल्लिखितं विद्यते। जम्बूद्वीपवर्णनं, अनेन नवपर्वतादीनां वर्णनं, श्राद्धसम्बन्धिविषयाः, परशुरामस्य कथा, सगरस्य वंशानुकीर्तनप्रसङ्गे गङ्गावतरणस्य सोमसूर्यवंशोद्भवानां राज्ञां च वर्णनं, सिद्धलक्ष्मी कथा, सीतास्तोत्रगणेशकवचतुल-सीकवचललितासहस्रनामस्त्रोत्रादीनि अत्र उपवर्णिताः सन्ति ।

**पुराणेषु विष्णोः शरीरावयवकल्पनम्** –

अष्टादशसुमहापुराणेषु ब्रह्मपुराणं विष्णोर्मस्तकम्, पद्मपुराणं हृदयम्, विष्णुपुराणं दक्षिणो बाहुः, शिवपुराणं वामबाहुः, भागवतं वक्षःस्थलम्, नारदीयपुराणं नाभिः, मार्कण्डेयपुराणं दक्षिणपादः, अग्निपुराणं वामपादः, भविष्यपुराणं दक्षिणजानुः, ब्रह्मवैवर्तं वामजानुः, लिङ्गपुराणं दक्षिणगुल्फम्, वाराहपुराणं वामगुल्फम्, स्कन्दपुराणं रोमाणि वामनपुराणं त्वक्, कूर्मपुराणं पृष्ठम्, मत्स्यपुराणं मेदः, गरुडपुराणं मज्जा, ब्रह्माण्डपुराणमस्थि चास्ति । एवं प्रकारेण अष्टादशपुराणेषु एक एव भगवान् नारायणः विराजते।

तथाचोक्तम् पद्मपुराणस्य स्वर्गखण्डे -

**ब्राह्मं मूर्धा हरेरेव हृदयं पद्मसंज्ञितम् । वैष्णवं दक्षिणो बाहुः शैवं वामो महेशितुः । ।**

**ऊरू भागवतम्प्रोक्तं नाभिः स्यान्नारदीयकम् । मार्कण्डेयञ्च दक्षाङ्घ्रिर्वामो ह्यग्नेयमुच्यते ।**

**भविष्यं दक्षिणो जानुविष्णोरेव महात्मनः । ब्रह्मवैवर्तज्ञन्तु वामो जानुरुदाहृतः । ।**

**लैङ्गन्तु गुल्फकं दक्षं वाराहं वामगुल्फकम्।। स्कान्दं पुराणं लोमानि त्वगस्य वामनं स्मृतम् ।।**

**मज्जा तु गारुडम्प्रोक्तं ब्रह्माण्डमस्थि गीयते । । एवमेवाभिवद्विष्णुः पुराणावयवो हरिः ।।** मत्स्य. ५३।५४,५५)

पुराणानि भगवतः स्वरूपमिति भावयित्वा पूजनीयानि।

*********************